# शारदा संस्कृतम्

## 4

अखिल-ब्रह्माण्डे संस्कृतम्

# शारदा-संस्कृतम्

## भागः - 4

## ( कक्षा चतुर्थी )


### लेखक मण्डल

**जगन्नाथ शर्मा**
अध्यक्ष - ग्रामीण शिक्षा विकास समिति, हरियाणा

**उपेन्द्र कुमार शास्त्री**
प्रधानाचार्य एवं शिक्षा प्रमुख, दिल्ली प्रान्त
उत्तर क्षेत्र संयोजक ( संस्कृत )

**प्रवीण सिंह**
प्रान्त संयोजक ( संस्कृत )
हिमाचल शिक्षा समिति

### संपादक मण्डल

नारायण सिंह - प्रान्त संयोजक ( संस्कृत ), हरियाणा
नरेन्द्र पाल - प्रान्त संयोजक ( संस्कृत ), दिल्ली
तिरिवीधि साम्ब शिवराव - आचार्य, स॰ ध॰ स॰ बा॰ मन्दिर पंजाबी बाग, दिल्ली



द्वितीय संस्करण - 2020

**विद्या भारती उत्तर क्षेत्र**
नारायण भवन, गीता निकेतन परिसर, कुरुक्षेत्र -136118
दूरभाष : 01744-259941 E-mail : vbukkkr@yahoo.co.in

मूल्यम् ₹ 55/-

# प्राक्कथनम्

संसारस्य प्राचीनतमा, श्रेष्ठा, वैज्ञानिकी च भाषा संस्कृतम् अनेकासां भाषाणां जननी अस्ति। सङ्गणकस्य कृते सर्वाधिका उपयुक्ता भाषा नूनमेव संस्कृतम्। आधुनिके युगे भविष्यस्य नवमसन्ततेः सङ्गणकस्य (9th generation computer) उत्पादनं संस्कृताधारेण एव भविष्यति। अत एव वयं वक्तुं शक्नुमः यत् एषा भाषा न केवलं प्राचीनतमा भाषा अपितु आधुनिकी भाषापि अस्ति। उच्यते हि सम्प्रति यत् **'संस्कृतं पठ, आधुनिको भव।'**

एकस्याः आख्यायाः अनुसारेण संस्कृतस्य प्रत्यक्षः अप्रत्यक्षश्च प्रभावः अखिलविश्वस्य प्रायः 97% भाषाणामुपरि वर्तते। उपर्युक्तकथनेन स्पष्टमेव यत् एषा भाषा सार्वदैशिकी भाषा। पुनः एषा भाषा जनभाषा भवतु, एतस्य कृते मिलित्वा प्रयत्नं कुर्मो वयम्।

बुद्धेः विकासाय संस्कृतमावश्यकम्। विद्या भारती एतां भाषाम् आधारभूतविषयरूपेण मानयति। अस्माकं विद्यालये द्वितीया-कक्षातः संस्कृतस्य अध्यापनं प्रारभ्यते। अस्य कृते बहुभ्यः दिनेभ्यः प्रयासः प्रचलति स्म यत् उत्तरक्षेत्रस्य संस्कृतस्यापि स्वपुस्तकं भवेत्। चिरकालादुत्पन्नविचारः गतवर्षमेव सफलः अभवत्। सम्प्रति पूर्णतया संशोधितं द्वितीयं संस्करणं भवतः सुधीजनस्य हस्ते अस्ति ।

कस्याः अपि भाषायाः चत्वारि कौशलानि वर्तन्ते - श्रवणम्, भाषणम्, पठनं लेखनञ्च। अतः चतुर्णां कौशलानां विकासाय अस्माकं सर्वं कार्यं भवेत्। कक्षायां बहुविध-शिक्षणोपकरणानां सहायतया अध्यापनं भवेत्। कक्षासु प्रत्यक्षविधिना, विभिन्नवस्तूनां प्रदर्शनमाध्यमेन, स्फोरक-पत्राणाम् उपयोगं कृत्वा, प्रश्नोत्तर-माध्यमेन, वार्तालापैः, सम्भाषणमाध्यमेन निरन्तरम् अध्यापनं भवेत्, येन छात्राः संस्कृतसम्भाषणे दक्षाः भवेयुः। आचार्यः प्रत्येकं पाठस्य 'पॉवर पॉइंट' प्रदर्शनस्य (PPT) स्तरानुसारं सम्यक् निर्माणं कृत्वा अध्यापनं कुर्यात् ।

समये समये संस्कृतवस्तु-प्रदर्शनी, सज्जपट्टे संस्कृतलेख-प्रदर्शनम्, कक्षाकार्यप्रदर्शनाय समुचिता व्यवस्था, भित्तिलेखः, संस्कृतगीतगायनम्, श्लोकगायनम्, सुभाषितलेखन-प्रतियोगिता, संस्कृतसुलेख-प्रतियोगिता, सम्भाषण-प्रतियोगिता, गीतापाठ-प्रतियोगिता, प्रश्नमञ्च-प्रतियोगिता चादयः स्वव्यवस्थानुसारम् अवश्यमेव कारयेत्। विद्यालये संस्कृतमय-वातावरणस्य निर्माणार्थं संस्कृताचार्यैः सदैव प्रयत्नो विधेयः।

बहुविधप्रयासेन संस्कृतं संस्कृतमाध्यमेन अध्यापनार्थं सम्भाषणाधारेण सरलभाषया च प्रस्तुतमिदं पुस्तकं भवतः सम्मुखम् अस्ति। संस्कृत-पुस्तकस्य कृते उत्तर-क्षेत्रस्य एषः प्रयासः अस्ति। अत एव त्रुटेः सम्भावना तु वर्तते एव। भवादृशान् सुधीजनान् निवेदयामः यत् आगामि-संस्करणस्य कृते प्रस्तुतपुस्तक-विषयकस्वविचारान् प्रेषयन्तु भवन्तः। भवतः सुधीजनस्य विचारः नूनमेव आगामिसंस्करणस्य कृते उपयोगी भविष्यति।

संस्कृतं सर्वत्र, संस्कृतं सर्वेषां कृते, संस्कृतं कण्ठे कण्ठे, संस्कृतं निरन्तरम्, संस्कृतं मुखे मुखे च भवतु इति मनसि निधाय संस्कृताध्ययनं भवेत्।

**श्रृणुत संस्कृतम् ! वदत संस्कृतम् !! पठत संस्कृतम् !!! लिखत संस्कृतम् !!!!**

**लसतु च संस्कृतं गृहे गृहे च पुनरपि।**

**जयतु संस्कृतम्। जयतु भारतम्**

**विदुषां पदकिङ्करः**
**उपेन्द्र-कुमार-शास्त्री**
**उत्तरक्षेत्र-संस्कृत-संयोजकः**

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | मङ्गलाचरणम् | 04 |
| | | आगच्छ स्मरामः | 05 |
| 01. | प्रथमः पाठः | परिचयः | 07 |
| 02. | द्वितीयः पाठः | आचार्य-शिष्य-संवादः | 11 |
| 03. | तृतीयः पाठः | कः/का किं करोति? ( कर्मकारकम् ) | 14 |
| 04. | चतुर्थः पाठः | उद्यानम् | 16 |
| 05. | पञ्चमः पाठः | मृदपि च चन्दनम् ( देशभक्ति-गीतम् ) | 19 |
| 06. | षष्ठः पाठः | कुरु कर्माणि | 20 |
| 07. | सप्तमः पाठः | सङ्ख्या | 22 |
| 08. | अष्टमः पाठः | साधनेन कार्यम् | 24 |
| 09. | नवमः पाठः | सुभाषितानि | 27 |
| 10. | दशमः पाठः | कः कस्मै / कस्यै ददाति? | 29 |
| 11. | एकादशः पाठः | विमानयानं रचयाम ( केवलं गायनार्थम् ) | 31 |
| 12. | द्वादशः पाठः | देवव्रतः ( अव्यय-पद-प्रयोगः ) | 32 |
| 13. | त्रयोदशः पाठः | सेवाव्रती भक्तिमती च शबरी | 37 |
| 14. | चतुर्दशः पाठः | सूक्तयः | 39 |
| | | परिशिष्टम् | 41 |
| | | सङ्गणक-विषयक-कक्षोपयोगि-शब्दावली | 47 |
| | | संस्कृत-गीतम् | 48 |

# मङ्गलाचरणम्



या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

या देवी सर्वभूतेषु विद्यारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

भावार्थ – जो देवी सभी प्राणियों में बुद्धि के रूप में एवं विद्या के रूप में स्थित है, उस विद्या की देवी को बारम्बार प्रणाम है।

## आगच्छ स्मरामः

ओ३म् भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।



रथयानम्



द्विचक्रिका



विद्युत्कोशयानम्



मैट्रोयानम्



द्वारम्



विद्युद्दीपः



चलदूरभाषः



कङ्कतम्



अयं कः?
अयं रक्ताङ्गः।



अयं कः?
अयं पटोलः।



इयं का?
इयं शिम्बा।



इदं किम्?
इदं स्थलपद्मम्।



बालकः



बालकौ



बालकाः



लता



लते



लताः



फलम्



फले



फलानि



गृहम्



गृहे



गृहाणि

| | | | | |
|---|---|---|---|---|
| एकम् | द्वे | त्रीणि | चत्वारि | पञ्च |
| षट् | सप्त | अष्ट | नव | दश |
| एकादश | द्वादश | त्रयोदश | चतुर्दश | पञ्चदश |
| षोडश | सप्तदश | अष्टादश | एकोनविंशतिः/ नवदश | विंशतिः |



एकवादनम्



द्विवादनम्



त्रिवादनम्



चतुर्वादनम्



पञ्चवादनम्



षड्वादनम्



सप्तवादनम्



अष्टवादनम्



नववादनम्



दशवादनम्



एकादशवादनम्



द्वादशवादनम्

# परिचयः

## प्रथमः पाठः


मम नाम प्रणवः।
भवतः नाम किम्?
मम नाम विकासः।


मम नाम गीतिका।
भवतः नाम किम्?
मम नाम अभिनवः।


मम नाम अभिनन्दनः।
भवत्याः नाम किम्?
मम नाम दीप्तिः।


मम नाम दिव्या।
भवत्याः नाम किम्?
मम नाम नमिता।


मम नाम रणवीरः।
भवतः नाम किम्?
मम नाम रक्षितः।
भवतः गृहं कुत्र अस्ति?
मम गृहं कुरुक्षेत्रे अस्ति।
भवतः गृहं कुत्र अस्ति?
मम गृहं
देहल्याम् अस्ति।


मम नाम नम्रता।
भवत्याः नाम किम्?
मम नाम आशा।
भवत्याः गृहं कुत्र अस्ति?
मम गृहं शिमलानगरे अस्ति।
भवत्याः गृहं कुत्र अस्ति?
मम गृहं
जालन्धरे अस्ति

भवान् किं करोति?

अहं पठामि। भवान् किं करोति?

अहं लिखामि। भवान् किं पठति?

अहं लेखं लिखामि।

अहं संस्कृतं पठामि। भवान् किं लिखति?



भवती किं करोति?

अहं खादामि। भवती किं करोति?

अहं पिबामि। भवती किं खादति?

अहं दुग्धं पिबामि।

अहं मिष्ठान्नं खादामि। भवती किं पिबति?



भवन्तः किं कुर्वन्ति?

वयं खेलामः। भवन्तः किं कुर्वन्ति?

वयं गायामः। भवन्तः किं खेलन्ति?

वयं कबड्डीं खेलामः। भवन्तः किं गायन्ति?

वयं गीतं गायामः





भवत्यः किं कुर्वन्ति?

वयं खादामः। भवत्यः किं कुर्वन्ति?

वयं पिबामः। भवत्यः किं खादन्ति?

वयं फलानि खादामः। भवत्यः किं पिबन्ति?

वयं जलं पिबामः।





भवत्यः किं कुर्वन्ति?

वयं पठामः। भवत्यः किं कुर्वन्ति?

वयं लिखामः। भवत्यः किं पठन्ति?

वयं संस्कृतं पठामः। भवत्यः किं लिखन्ति?

वयं गृहकार्यं लिखामः।








## शब्दार्थाः

**भवान्/भवती** – आप, **भवताम्/भवतीनाम्** – आप सभी का, **मम** – मेरा, **कुत्र** – कहाँ, **कुर्वन्ति** – करते हैं, **पठामि** – पढ़ता हूँ, **लिखामि** – लिखता हूँ, **खादामि** – खाता हूँ, **पिबामि** – पीता हूँ, **किम्** – क्या, **नयामि** – ले जाता हूँ, **अस्माकम्** – हमारा।

## अभ्यासः

**1. एतान् पुनः पठतु स्मरणं च करोतु –**

| | | | | |
|---|---|---|---|---|
| 1. हसति – हसन्ति | 2. वहति – वहन्ति | 3. करोति – कुर्वन्ति | 4. शक्नोति – शक्नुवन्ति | 5. पूजयति – पूजयन्ति |
| 6. चोरयति – चोरयन्ति | 7. भवान् – भवन्तः | भवती – भवत्यः | 9. भवतः – भवताम् | 10. भवत्याः – भवतीनाम् |

**2. एतेषां प्रश्नानाम् उत्तराणि स्वमत्यनुसारं लिखतु –**

क) भवतः/भवत्याः नाम किम्? .......................................................... ।

ख) भवतः/भवत्याः गृहं कुत्र अस्ति? .......................................................... ।

ग) भवतः/भवत्याः विद्यालयः कुत्र अस्ति? .......................................................... ।

घ) भवान् / भवती किं पठति? .......................................................... ।

ङ) भवान्/भवती किं गायति? .......................................................... ।

**3. मञ्जूषां विलोक्य रिक्त-स्थाने उचितं सर्वनाम-पदं लिखतु –**

**मञ्जूषा** – **ते, सः, वयं, अहं, सा, ताः**

क) .............................. खादति। ख) .............................. वदामि।

ग) .............................. लिखति। घ) .............................. यच्छन्ति।

ङ) .............................. पठामः। च) .............................. पिबन्ति।

4. मञ्जूषायां प्रदत्तधातूनां सहायतया निम्नलिखितेषु प्रश्नेषु प्रत्येकं प्रश्नस्य चत्वारि-चत्वारि उत्तराणि लिखतु –

मञ्जूषा – हस्, चल्, खेल्, खाद्, धाव्, नम्, पा, गम्, पूज्

अ. भवान् किं करोति?

यथा – अहं पठामि।

क) ........................................।
ख) ........................................।
ग) ........................................।
घ) ........................................।

आ. भवान् किं करोति?

यथा – अहं लिखामि।

क) ........................................।
ख) ........................................।
ग) ........................................।
घ) ........................................।

इ. भवन्तः/भवत्यः किं कुर्वन्ति?

यथा – वयं पश्यामः।

क) ........................................।
ख) ........................................।
ग) ........................................।
घ) ........................................।

ई. वयं किं कुर्मः?

यथा – वयं पठामः।

क) ........................................।
ख) ........................................।
ग) ........................................।
घ) ........................................।

5. उदाहरणानुसारम् एतानि वाक्यानि बहुवचने परिवर्तयतु –

| | |
|---|---|
| यथा – अहं संस्कृतं पठामि। | यथा – वयं संस्कृतं पठामः। |
| क) अहं फलं खादामि। | ........................................ |
| ख) अहं शीतलपेयं पिबामि। | ........................................ |
| ग) अहं गीतं गायामि। | ........................................ |
| घ) अहं कार्यं करोमि। | ........................................ |

## आचार्याय

1. इस पाठ के आधार पर सभी भैया-बहिनों के बीच इस क्रम से सम्भाषण करवाएँ।
   क) 1. एक भैया का एक भैया के साथ। 2. एक बहिन का एक बहिन के साथ।
   3. एक भैया का एक बहिन के साथ।
   ख) 1. पाँच-पाँच भैयाओं का दो गण बनाकर। 2. पाँच-पाँच बहिनों के दो गण बनाकर।
   3. पाँच भैयाओं और पाँच बहिनों के अलग-अलग गण बनाकर।
2. विभिन्न क्रियापदों में परिवर्तन करके यथा – 'करोति' के स्थान पर पठति, लिखति आदि का प्रयोग करके।

# आचार्य-शिष्य-संवादः






**(आचार्यः कक्षां प्रविशति। सर्वे छात्राः उत्तिष्ठन्ति।)**

छात्रा : – नमस्ते आचार्य-महोदय!

**आचार्यः** – नमो नमः। उपविशन्तु, किं सर्वे छात्राः उपस्थिताः सन्ति?

कक्षानायकः – नैव आचार्य! प्रमोदः अनुपस्थितः अस्ति।

**आचार्यः** – कारणं किम्?

कक्षानायकः – तस्य गृहे अद्य हवनम् अस्ति।

**आचार्यः** – अस्तु, अधुना स्व-स्व-उपस्थितिं वदतु। यस्य छात्रस्य नाम अहं वदिष्यामि, सः **'उपस्थितोऽस्मि आचार्य!'** इति वदतु। (आचार्यः नाम वदति।) विनोदः

विनोदः – उपस्थितोऽस्मि आचार्य!

**आचार्यः** – माधवः ..............? (सर्वे मौनम् उपविशन्ति) माधवः नास्ति किम्?

माधवः – आचार्य! किम् अहम् अन्तः प्रविशानि?

**आचार्यः** – अहो! माधवः, आगच्छतु। किमर्थं विलम्बः?

माधवः – गृहे स्नाने विलम्बः अभवत्।

**आचार्यः** – एतत् न उचितम्।

माधवः – क्षम्यताम् आचार्य! अद्य मम गृहे जलं विलम्बेन आगतम्।

**आचार्यः** – अस्तु, अधुना शारदासंस्कृत-पुस्तकम् उद्घाटयन्तु।

रमाकान्तः – आचार्य! द्वितीयं पाठम् एव।

**आचार्यः** – आम्! द्वितीयं पाठम् एव उद्घाटयन्तु।

सर्वे छात्राः – अस्तु, आचार्य! एषः पाठः अतीव शोभनः अस्ति।

**आचार्यः** – (आदर्शवाचनं करोति।) पठतु संस्कृतम्, जयतु भारतम्........

(सर्वे छात्राः अनुवाचनं कुर्वन्ति। तदनन्तरं सर्वे सोत्साहेन सर्वाणि कार्याणि कुर्वन्ति।)

**आचार्यः** – (अनन्तरं घण्टानादः भवति।) शृण्वन्तु घण्टानादः अभवत्। श्वः पाठस्य अनुवर्तनं करिष्यामः।

छात्राः – धन्यवादः आचार्य!

**आचार्यः** – स्वागतम्।

## शब्दार्थाः

**प्रविशति** – प्रवेश करता है, **सर्वे** – सभी, **उत्तिष्ठन्ति** – खड़े होते हैं, **नैव** – नहीं, **अद्य** – आज, **प्रविशानि** – प्रवेश करूँ?, **किम्** – क्या, **अन्तः** – भीतर, **श्वः** – आनेवाला कल, **सोत्साहेन** – उत्साह पूर्वक, **अधुना** – इस समय (अब), **तदनन्तरम्** – उसके बाद, **उद्घाटयन्तु** – खोलिए, **अनुवाचनम्** – दोहराना, **मम** – मेरा, **शृण्वन्तु** – सुनो, **क्षम्यताम्** – क्षमा कीजिए, **अनुवर्तनं** – पुनरावृत्ति।

## अभ्यासः करणीयः

**( कक्षायां प्रवेश-समये )**

**छात्रः** – आगच्छानि? श्रीमन् !

**आचार्यः** – आगच्छतु।

**( कक्षायाः बहिः गमन-समये )**

**छात्रः** – किम् अहं बहिः गन्तुं शक्नोमि? आचार्य! / बहिः गच्छानि? श्रीमन् !

**आचार्यः** – गच्छतु / मास्तु।

## कक्षा - सम्बन्धित-शब्दानां परिचयः

लेखनी = कलम, अङ्कनी = पेंसिल, घर्षकः = रबर, वर्णलेखनी = कलर पैंसिल, मापिका = स्केल, पुस्तकम् = किताब, पुस्तिका = कापी, पञ्जिका = रजिस्टर, स्यूतः = बैग, सुधाखण्डः = चॉक, मार्जकः = डस्टर, उत्पीठिका = मेज, आसन्दिका = कुर्सी, काष्ठासनम् = बेंच, मञ्जूषा = अलमारी

## अभ्यासः

**1. एतेषां प्रश्नानाम् उत्तराणि लिखतु –**

क) प्रमोदः किमर्थम् अनुपस्थितः? ................................................................................. ।

ख) छात्रः उपस्थिति–समये किं वदति? ................................................................................. ।

ग) कः विलम्बेन आगच्छति? ................................................................................. ।

घ) के अनुवाचनं कुर्वन्ति? ................................................................................. ।

**2. वाक्यं शुद्धम् अशुद्धं वा इति लिखतु –**

क) प्रमोदस्य गृहे गणपतिपूजा अस्ति। ..............................................

ख) माधवः विलम्बेन आगच्छति। ..............................................

ग) माधवस्य भोजनं न अभवत्। ..............................................

घ) श्वः पाठस्य अनुवर्तनं करिष्यामः। ..............................................

**3. मञ्जूषायाः सहायतया रिक्तस्थानं पूरयतु –**

**मञ्जूषा – जलं, अनुवर्तनं, उपस्थिताः, हवनम्**

क) किं सर्वे छात्राः .......................... सन्ति?

ख) प्रमोदस्य गृहे अद्य .......................... अस्ति।

ग) गृहे .......................... विलम्बेन आगतम्।

घ) श्वः पाठस्य .......................... करिष्यामः।

**4. पठ् धातोः लट्लकारस्य रूपाणि रिक्तस्थाने पूरयतु –**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | ...................... | **पठतः** | ...................... |
| **मध्यमपुरुषः** | **पठसि** | ...................... | **पठथ** |
| **उत्तमपुरुषः** | ...................... | **पठावः** | ...................... |

### आचार्याय

भैया/बहिनों में एक–एक को आचार्य मानकर कक्षा में अभिनय के साथ सम्भाषण विधि द्वारा पाठ का अनुवर्तन करवाएँ। इसी तरह समयानुकूल अन्य विषय को लेकर लघु संवाद लिखकर प्रार्थनास्थल पर अभिनय करवाएँ।